# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ४२

तत्रोपविष्टं राजानमुपासन्ते विचक्षणाः ।
कथानां बहुरूपाणां हास्य काराः समन्ततः ॥ १ ॥

विजयो मधुमत्तश्च काश्यपः पिङ्गलः कुशः ।
सुराजिः कालियो भद्रो दन्तवक्रः समागधः ॥ २ ॥

एते कथा बहुविधा परिहाससमन्विताः ।
कथयन्ति स्म संहृष्टा राघवस्य महात्मनः ॥ ३ ॥

ततः कथायां कस्यां चिद्राघवः समभाषत ।
काः कथा नगरे भद्र वर्तन्ते विषयेषु च ॥ ४ ॥

मामाश्रितानि कान्याहुः पौरजानपदा जनाः ।
किं च सीतां समाश्रित्य भरतं किं नु लक्ष्मणम् ॥ ५ ॥

किं नु शत्रुघ्नमाश्रित्य कैकेयीं मातरं च मे ।
वक्तव्यतां च राजानो नवे राज्ये व्रजन्ति हि ॥ ६ ॥

एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत् ।
स्थिताः कथाः शुभा राजन्वर्तन्ते पुरवासिनाम् ॥ ७ ॥

अयं तु विजयः सौम्य दशग्रीववधाश्रितः ।
भूयिष्ठं स्वपुरे पौरैः कथ्यते पुरुषर्षभ ॥ ८ ॥

एवमुक्तस्तु भद्रेण राघवो वाक्यमब्रवीत् ।
कथयस्व यथा तथ्यं सर्वं निरवशेषतः ॥ ९ ॥

शुभाशुभानि वाक्यानि यान्याहुः पुरवासिनः ।
श्रुत्वेदानीं शुभं कुर्यां न कुर्यामशुभानि च ॥ १० ॥

कथयस्व च विस्रब्धो निर्भयो विगतज्वरः ।
कथयन्ते यथा पौरा जना जनपदेषु च ॥ ११ ॥

राघवेणैवमुक्तस्तु भद्रः सुरुचिरं वचः ।
प्रत्युवाच महाबाहुं प्राञ्जलिः सुसमाहितः ॥ १२ ॥

शृणु राजन्यथा पौराः कथयन्ति शुभाशुभम् ।
चत्वरापणरथ्यासु वनेषूपवनेषु च ॥ १३ ॥

दुष्करं कृतवान्रामः समुद्रे सेतुबन्धनम् ।
अकृतं पूर्वकैः कैश्चिद्देवैरपि सदानवैः ॥ १४ ॥

रावणश्च दुराधर्षो हतः सबलवाहनः ।
वानराश्च वशं नीता ऋष्काश्च सह राक्षसैः ॥ १५ ॥

हत्वा च रावणं युद्धे सीतामाहृत्य राघवः ।
अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत् ॥ १६ ॥

कीदृशं हृदये तस्य सीतासम्भोगजं सुखम् ।
अङ्कमारोप्य हि पुरा रावणेन बलाद्धृताम् ॥ १७ ॥

लङ्कामपि पुनर्नीतामशोकवनिकां गताम् ।
रक्षसां वशमापन्नां कथं रामो न कुत्सते ॥ १८ ॥

अस्माकमपि दारेषु सहनीयं भविष्यति ।
यथा हि कुरुते राजा प्रजा तमनुवर्तते ॥ १९ ॥

एवं बहुविधा वाचो वदन्ति पुरवासिनः ।
नगरेषु च सर्वेषु राजञ्जनपदेषु च ॥ २० ॥

तस्यैतद्भाषितं श्रुत्वा राघवः परमार्तवत् ।
उवाच सर्वान्सुहृदः कथमेतन्निवेद्यताम् ॥ २१ ॥

सर्वे तु शिरसा भूमावभिवाद्य प्रणम्य च ।
प्रत्यूचू राघवं दीनमेवमेतन्न संशयः ॥ २२ ॥

श्रुत्वा तु वाक्यं काकुत्स्थः सर्वेषां समुदीरितम् ।
विसर्जयामास तदा सर्वांस्ताञ्शत्रुतापनः ॥ २३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com